National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(67): 107-108
© 2026 NJHSR
www.sanskritarticle.com

**श्री डि. श्रीनिवासरावः**
शोधच्छात्रः, शिक्षाशास्त्रविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# महाभारतस्य आदिपर्वणि निर्देशनविषयकांशानाम् अध्ययनम्

**श्री डि. श्रीनिवासरावः**

**भूमिका –**

**धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ।**
**यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्॥1**

इत्येवं कृतप्रतिज्ञः भगवान् वेदव्यासः धर्मार्थकामविषयकान् सर्वान् महाभारते समीचीनतया अवर्णयत्। तदनुशीलने क्वचिदुपदेशः क्वचिच्च परामर्शः महर्षिणा वेदव्यासेन उपदिष्टः। उपदेशशब्दः दिशँ-अतिसर्जने (अदादि-प-अनिट्) इत्यस्मात् धातोः निष्पन्नः। सर्जनं नाम नूतना सृष्टिः। किमत्र सृज्यते इति चेत् शिष्येण यदज्ञातः, गुरुणा च यः अर्थः ज्ञातः, तमर्थं गुरुः अपूर्वविषयतया अज्ञातविषयकस्य शिष्यस्य बुद्धिस्थं करोति। उपदेशस्तु सर्ववस्तुविषयकः। यत्र विषयविशेषमुद्दिश्य गुरुः उपदिशति, स विषयः शिष्येण अवगन्तव्यः इति गुरुः आज्ञापयति। ततः एकविषयकोपदेशः निर्देशशब्देन ग्राह्यो भवति। निर्दिष्टो देशः निर्देशः इति तस्यार्थः। एकविषयकम्, पृथग्विषयकम्, प्रत्येकविषयकम्, अपेक्षितविषयकं वा ज्ञानं निर्देशशब्दवाच्यं भवति। दिश-धातुः अध्यापनार्थकः आज्ञार्थकश्च उपसर्गभेदेन भवत्येव, एवमेव निर्देशशब्दोऽपि।

उपनिषत्सु गुरुः सर्वाः विद्याः स्वयमधीत्य, अधीतविद्याः शिष्याय उपदिशतीति स्पष्टमेव। तदनु इत्थम् उपदिशति गुरुः। यथा – यः सकलज्ञानराशिः त्वया अधिगतः, तत्ते जीवतयात्रायै ऐहिकामुष्मिक-प्रयोजकः भवतीति। तथा हि – वेदमनूद्य आचार्योऽन्तेवासिनम् अनुशास्ति –

**सत्यं वद, धर्मं चर, स्वाध्यायान्मा प्रमदः, धर्मान्न प्रमदितव्यम्, कुशलान्न प्रमदितव्यम्, भूत्यै न प्रमदितव्यम्, स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्, देवपितृकार्याभ्यां न प्रमदितव्यम्, मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, अतिथिदेवो भव, यान्यनवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि, यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि नो इतराणि, एष आदेशः, एष उपदेशः।** इत्येवंरूपः निर्देशोऽपि आदेश एव। किन्तु लक्षणया शाब्दबोधे भेदो गृह्यते।

शिष्याः अपि त्रिविधाः भवन्ति। उत्तमाधिकारिणः, मध्यमाधिकारिणः, अधमाधिकारिणः चेति। तेषां मानसिकशक्तिमनुसृत्य गुरुः विषयान् उपदिशति। शिष्यः सर्वोऽपि उत्तमाधिकारी भवेदिति नैकान्तो नियमः। गुरुस्तु शिष्ययोग्यतां वीक्ष्य शास्त्ररूपेण उपाख्यानरूपेण सारांशरूपेण उपदिशति। तदुक्तं निरुक्ते यथा –

**अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेष्वसमा बभूवुः।**
**आदघ्नास उपकक्षास उत्वे यथा ह्रदाः प्रस्नेया ददृशिरे॥2**

पाणिपादस्थितेः समानत्वेऽपि ग्रहणशक्तौ तारतम्यं भवतीत्यर्थः। कश्चन योग्यो गुरुः यथा शिष्यशक्तिं परीक्ष्य शास्त्रविषयान् निर्दिशति। एवंविधाः निर्देशाः महाभारतस्य अष्टादशपर्वसु शताधिकाः दृश्यन्ते। विशेषतः शान्तिपर्वणि, अनुशासनपर्वणि च योगीश्वरेण श्रीकृष्णेन प्रेरितः भीष्मपितामहः युधिष्ठिराय बहुविधान् सूक्ष्मधर्मान् निर्दिशति। परं तत्पर्वद्वयविषयाः पूर्वसूरयः बहवः शोधितपूर्वाः इति कृत्वा “महाभारतप्रथमपर्वषट्कस्य विषयाः” निर्देशविषयकाः परामर्शविषयकाः च इति पूर्वैरस्पृष्टः विषयः सम्प्रति स्वीकृतः। एते विषयाः पर्वक्रमेण अध्यायक्रमेण च अस्मिन् शोधलेखे परामृष्टाः सन्ति।

प्रतिविषयं प्रस्तावना, व्याख्याविश्लेषणम्, परिचर्चा, अध्येयसारांशः इति चत्वारः अंशाः विषयस्य स्पष्टप्रतिपत्तये विमृष्टाः सन्ति। तदस्य स्वरूपमत्र ईषन्निरूप्यते।

**Correspondence:**
**श्री डि. श्रीनिवासरावः**
शोधच्छात्रः, शिक्षाशास्त्रविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**अ. प्रस्तावना –** प्रस्तूयते अनेन अस्मिन् वा विषयः इति प्रस्तावना। यथा कस्मिन्नवसरे किमर्थं केन कस्मै अयं निर्देशः परामर्शो वा क्रियते इति विषयः विवृतो भवति।

**आ.व्याख्याविश्लेषणम् –** विश्लेषो नाम विभागः। व्याख्या नाम विवृतिः। विषय-विभागरूपेण विवृतिः, विश्लेषणं च क्रियते। तदुभयमपि व्याख्याविश्लेषणमुच्यते।

**इ. परिचर्चा –** अनेन प्रस्तुतेन निर्देशेन परामर्शेन वा निर्दिष्टः परामृष्टः वा कथं प्रतिस्पन्दते इति विवेचनमेव परिचर्चा।

**ई. अध्येयसारांशः –** अन्ते निर्देशेन परामर्शेन वा साध्यं प्रजोयनम् अध्येयसारांशो भवति।

## १. पौष्यकथा – (Educational Guidance and Personal Guidance)

### अ. प्रस्तावना –

महाभारतेतिहासश्रवणं केन कदा कथं वा अभूदिति निरूपयितुम् अनुक्रमणिकाध्यायाद् आरभ्य अंशावतारसम्भवादिपर्वसु कयापि प्रणालिकया महर्षिणा निबद्धानि। सर्पयागः एव महाभारतश्रवण-कारणमभूत्। सर्पयागः किमर्थमभूदिति निरूपयितुम् उत्तङ्कोपाख्यानं निबद्धम्। उत्तङ्कस्य स्वभावनिरूपणार्थं कुण्डलाहरणकथा विस्तरेण निरूपिता।

### आ. व्याख्याविश्लेषणम् –

वेदस्य गुरोः शिष्यः उत्तङ्कः। स च अत्यन्तसहनशीलः गौरिव गुरुणा धूर्षु नियुक्तोऽपि न किञ्चिदुक्त्वा गुरोः कर्म अनुतिष्ठति। तथाविधस्य गुरोः शिष्यः उत्तङ्कः। समाप्तविद्यः उत्तङ्कः गुरुदक्षिणां दास्यामि इति गुरुं प्रार्थयामास। वेदस्तु आदिशत् - तदर्थं गुरुभार्या प्रष्टव्या इति। वेदस्य गुरुः वेदारम्भात् प्राक् धर्मसूक्ष्मम् एवम् अध्यापितवान्। यथा –

**यश्चाधर्मेण वै ब्रूयाद्यश्चाधर्मेण पृच्छति।**
**तयोरन्यतरः प्रैति विद्वेषं चाधिगच्छति॥[3]**

गुरुः त्वमेव धर्मसूक्ष्मम् उत्तङ्कमध्यापयितुमिच्छसि। वेदः सहनशीलः इति हेतोः तं धर्ममनुष्ठितवान् उत्तङ्कः स्वयममर्षण-शीलः। गुरुभावतोऽपि गुरुकार्येऽपि परैः कृतः पराभवः सोढुं नेष्यते। श्राद्धकर्मणि राज्ञा पौष्येण नियुक्तः भोजनसमये अन्ने केशं दृष्ट्वा पुष्यमन्धो भविष्यति इति शशाप। पौष्योऽपि उत्तङ्कम् अनपत्यो भविष्यसि इति शशाप। उत्तङ्कपौष्ययोः अन्योन्यभाषणम् इममर्थं स्पष्टीकरोति। पौष्यः सहनशीलः धर्मण उत्तङ्कं निमन्त्रितवान्। उत्तङ्कोऽपि कालावधिमप्रतीक्ष्य यथोपपन्नेनान्नेन भोजनं कर्तुमैच्छत्। तत एव दोषः समुत्पन्नः। एवं पौष्ये द्वेषवान् अभूत्। अधर्मेण पौष्यं शस्वा पौष्येण प्रतिशप्तः। अनन्तरं पश्चात्तप्तः सन् शापद्वयम् उपसंहृतवान्। यथा –

**अथोत्तङ्कः सकेशं शीतमन्नं दृष्ट्वा अशुच्येतदिति मत्वा तं पौष्यमुवाच। यस्मान्मे अशुच्यन्नं ददासि तस्मादन्धो भविष्यसीति।**

**तं पौष्यः प्रत्युवाच– यस्मात्त्वमप्यदुष्टमन्नं दूषयसि, तस्मात्त्वमन-पत्यो भविष्यसीति। तमुत्तङ्कः प्रत्युवाच।**

**न युक्तं भवतान्नमशुचि दत्वा प्रतिशापं दातुं तस्मादन्नमेव प्रत्यक्षी-कुरु।ततः पौष्यस्तदन्नमशुचि दृष्ट्वा तस्याशुचिभावमपरोक्षयामास।**

**अथ तदन्नं मुक्तकेश्या स्त्रिया यत्कृतमनुष्णं सकेशं चाशुच्येतदिति मत्वा तमृषिमुत्तङ्कं प्रसादयामास। भगवन्नेतदज्ञानादन्नं सकेशम् पाहृतं शीतं तत्क्षामये भवन्तं न भवेयमन्ध इति तमुत्तङ्कः प्रत्युवाच।**

**न मृषा ब्रवीमि भूत्वा त्वमन्धो न चिरादनन्धो भविष्यसीति। ममापि शापो भवता दत्तो न भवेदिति।**

**तं पौष्यः प्रत्युवाच न चाहं शक्तः शापं प्रत्यादातुं न हि मे मन्युरद्याप्युपशमं गच्छति किं चैतद्भवता न ज्ञायते तथा।[4]**

### इ.परिचर्या –

उत्तङ्कप्रस्थानादारभ्य गुरुपत्न्यै कुण्डलप्रदानपर्यन्ता कथा विस्तृततरा वर्तते। सर्वापि कथा लेखविस्तरकारणमिति कथासारः उदाहृतः। लोके केचिदसौम्याः सौम्यरूपेण दृश्यन्ते। असौम्या अपि सौम्या इति भ्रान्तिमुत्पादयन्ति। एषः विषयः शान्तिपर्वणि भीष्मपितामहेन विस्तरेण निरूपितः।

असौम्याः सौम्यरूपेण सौम्याश्चासौम्यदर्शनाः ते कथं ज्ञेयाः इति युधिष्ठिरः भीष्मम् अपृच्छत्। तत्रापि महती चर्चा वर्तते। किन्तु पौष्योपाख्यानमपि तन्निरूपकं भवति। उत्तङ्कः जात्या ब्राह्मणः। गुरुदक्षिणार्थी आगतः, प्रायशः सौम्यो भवति। पौष्यः स्वयं राजा अर्थिने दाता अन्यकृतं पराभवं क्षत्रियत्वात् न सहते। किन्तु अत्र उभयोः प्रवृत्तौ प्रातिलोम्यं दृष्टम्। पौष्यः उत्तङ्कमनुनीते तमेव धर्मं लोकनीतं च निर्दिशति।

### ई.अध्येयसारः –

उत्तङ्केन अज्ञातः विषयः पौष्येण बोधितः इति हेतोः इदमुपाख्यानं निर्देशनं भवति। राजा एकः, उत्तङ्कः द्वितीयः इति कृत्वा एकमुद्दिश्य द्वितीयेन निर्देशः कृतः इति हेतोः व्यक्तिमुद्दिश्य व्यक्तिकृतोऽयं निर्देशो भवति।

निर्दिष्टांशस्तु यः वाचा तीक्ष्णप्रकृतिकः सः मृदुः कदाचित् भवेत्। यो वाचां मृदुः सः कठिनहृदयो भवेदिति सारांशः पौष्योक्ते श्लोके प्रतिपादितः। यथा –

**नवनीतं हृदयं ब्राह्मणस्य**
**वाचि क्षुरो निशितस्तीक्ष्णधारः।**
**तदुभयमेतद्विपरीतं क्षत्रियस्य**
**वह्नावनीतं हृदयं तीक्ष्णधारमिति॥[5]**

ब्राह्मणक्षत्रियशब्दौ पृथक्कृत्य गृहीते अर्थे तीक्ष्णवाक् इति भयं न कार्यम्, मृदुवागिति विश्वासोऽपि न कार्यः इति लौकिकं प्रयोजनं सारभूतमध्येयम्। इदं च विषयविशेषबोधनात् शिक्षां ददाति इति शैक्षिकम्, व्यक्तिकृतमिति वैयक्तिकं निर्देशरूपेण कृतम् आङ्ग्ल-भाषायां –

**Educational and Personal Guidance.**

### सन्दर्भग्रन्थसूची –

१. महाभारतम् – गीताप्रेस, गोरखपूर, विक्रमसंवत् – २०७२

२. निरुक्तम् – महर्षियास्कः, निर्वचनटीका, कलकत्ता – वैक्रमाब्द – २००९

३. अमरकोशः – गुरुबालप्रबोधिकाव्याख्या– श्रीजयलक्ष्मीपब्लि-केषन्स्, विजयवाडा।

### पाद टिप्पणी

1 महाभारतम् – आदिपर्व – ६२.५३
2 निरुक्तम् – नैघण्टुकाण्डम् – १.३.४, पु.सं.-६४
3 महाभारतम् – आदिपर्व – ३.९१, पु.सं.-४७
4 महाभारतम् – आदिपर्व – ३.१६-२२ वचनानि, पु.सं.-४९
5 महाभारतम् – आदिपर्व – ३.२३, पु.सं.-४९